**दिनाङ्क :- 01.04.2024**
**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री – मुम्बईयात्रा**

प्रधामन्त्री नरेन्द्र मोदी अद्य एकदिवसीयात्रार्थं मुम्बईनगरं प्रति यास्यति। स्वकीय-यात्रावधौ प्रधानमन्त्री मुम्बय्यां भारतीय-रिजर्व-बैंकइत्येतस्य नवतिवर्षाणां पूर्त्यवसरे एकस्मिन् उत्सवे सम्मिलितो भविष्यति। एतस्मिन् कार्यक्रमे केन्द्रीय-वित्तमन्त्री निर्मला-सीतारमण् वित्तराज्यमन्त्री भागवत-किशनराव-कराड: पंकज चौधरी च भागं भजिष्यन्ति। अत्रावसरे आर्.बी.आई गवर्नर इति शक्तिकान्तदास: कार्यक्रमं एनं सम्बोधयिष्यति। अवधेयं वर्तते यत् भारतीय-रिजर्व-बैंक इत्यस्य स्थापना पञ्चत्रिंशदुत्तर-नवदश शततमवर्षस्य अप्रैलमासस्य प्रथमे दिनांके जाता। सम्प्रति वित्तकोषेण अनेन नवतिवर्षाणि सम्पूरितानि। रिजर्वबैंकइति एकस्य स्मारककार्यक्रमस्य आयोजनं करोति। यस्मिन् महाराष्ट्रस्य मुख्यमन्त्री एकनाथशिंदे उपमुख्यमन्त्रिणौ देवेन्द्रफणनवीस: अजीतपवारश्च विविधबैंकानां उद्योगानाञ्च प्रतिनिधय: सम्मिलिता: भविष्यन्ति।

**मेरठ-जनसभा**

भाजपा-दलस्य वरिष्ठनेत्रा प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना ह्य: उत्तरप्रदेशस्य मेरठ-जनपदे भाजपा-दलस्य लोकसभा-निर्वाचन-प्रचाराभियानस्य आरम्भः कृतः। जनसभां सम्बोधयन् श्रीमोदी अवदत् यत् ऐषमः लोकसभानिर्वाचनं केवलं सर्वकारस्य निर्माणार्थं न, अपि तु भारतं विकसितराष्ट्रं विश्वस्य तृतीयं बृहत्तमं आर्थिकमहाशक्तिं च कर्तुं भवति। सः अवदत् यत्, यदा भारतं विश्वस्य एकादश-तमा बृहत्तमा अर्थव्यवस्था आसीत् तदा भारतस्य निर्धनता- संवर्धमाना आसीत्। प्रधानमन्त्रिणा उक्तं यत्, यदा भारतं पञ्चमा बृहत्तमा अर्थव्यवस्था अभवत् तदा पञ्चविंशति-कोटिभ्यः अपि अधिकाः जनाः सफलतया निर्धनरेखात: बहि: आगताः। सः अवदत्, यदा भारतं तृतीयं बृहत्तम-अर्थव्यवस्था भविष्यति तदा उन्मूलनं भविष्यति तथा च मध्यमवर्गः भारतस्य विकासाय ईंधनं प्रदास्यति। प्रधानमन्त्रिणा उक्तं यत्, भारतं विनिर्माणक्षेत्रे अभूतपूर्वं निवेशं कुर्वद् अस्ति तथा च देशस्य युवानः प्रत्येकस्मिन् क्षेत्रे अनेकान् अवसरान् प्राप्नुवन्ति। श्रीमोदी अवदत्, अद्य भारतस्य विश्वसनीयता सम्पूर्णे विश्वे उन्नतस्थाने अस्ति तथा च समग्रं विश्वं भारतं प्रति पश्यति।

अवधेयं वर्तते यत् भाजपेति-दलेन रामायण-धारावाहिक-प्रसिद्ध-नायक: अरुणगोविल: अस्मात् लोकसभा-क्षेत्रात् निर्वाचनसमरांगणे अवतारित:। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथ: राष्ट्रिय-लोक-दलाध्यक्ष: जयन्तचौधरी भाजपादलस्य अन्ये च वरिष्ठनेतार: उपस्थिता: आसन्।

**जयपुर-अमितशाहयात्रा**

भाजपेतिदलस्य वरिष्ठनेता गृहमन्त्री च अमितशाह: द्विदिवसीयात्रायां राजस्थानराज्ये अस्ति। राजस्थाने द्वयो: चरणयो: सम्पद्यमानस्य लोकसभा-निर्वाचनस्य अन्तर्गतं असौ जयपुरे संघटनात्मकोपवेशनं विहितवान्। श्रीशाह: जयपुरे दलनेतृणां एकस्योपवेशन-स्य अध्यक्षतां अथ च पञ्च लोकसभा-क्षेत्रेषु दौसा-करौली-धौलपुर-नागौर-चुरू-झुंझनु जनपदानां निर्वाचनसज्जताया: समीक्षां कृतवान्। श्रीशाह: ह्य: सायं सीकरनगरे एका पथप्रदर्शनी कृतवान्। गृहमन्त्री अद्य जोधपुर-पाली-जालौर-सिरोही-बाडमेर-लोकसभा-सनानां नेतृणां उपवेशने भागग्रहणाय जोधपुरं प्रति गमिष्यति।

**आई.पी.एल्**

आई.पी.एल्. इति क्रिकेट्-प्रतिस्पर्धाया: प्रचल्यमाणे त्रयोदश संस्करणे ह्य: जातायां प्रतिस्पर्धायां वाई.एस्. राजशेखर-रेड्डी-क्रिकेट-क्रीडांगणे विशाखापत्तनमस्य डेल्हीकैपिटल्सदलेन चेन्नै-सुपरकिंग्स दलं विंशति धावनांकै: पराजितम्। अद्य मुम्बय्या: वानखेडे क्रीडांगणे मुम्बई-इण्यिन्सदलं राजस्थानरॉयल्स दलेन सह क्रीडिष्यति। प्रतिस्पर्धाया: प्रसारणं सार्ध-सप्तवादनतो भविष्यति।

**।। इति वार्ता: ।।**